॥ श्री गणेशाय नमः ॥

॥ अथ दर्शपूर्णमास याजुषहौत्र प्रयोग प्रारंभः ॥

॥ हिरण्यकेशीयः ॥ (१)

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः॥

अथ अध्वर्युर्णां कुप्ते होतृषदने होतरेही स्रुक्ते।
प्रनिवीती। देवायो अप्सु महिम इष्वः सद्ध मापः प्रवेइस् यत्किंच
दुरितं मयि। यच्चाह मभिदुद्रोह यच्च शेपे उदाकृतं॥
अप आचामति। यज्ञोपवीति। पुनराचम्य। विहार-
मभ्यावृत्य। भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः
सुवः प्रपद्ये सत्यं प्रपद्ये ऋतं प्रपद्ये मृतं प्रपद्ये प्रजापतेः
प्रियां तनुव मर्मार्तीं प्रपद्ये गायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये
जगतीं प्रपद्येऽनुष्टुभं प्रपद्ये [illegible] प्रपद्ये। इत्यंतरेण
वेद्युत्करौ प्रपद्ये। उत्तरेण वेदिं प्राङ्मुख मवस्थाय।
छंदोभिश्छादये छंदोभिश्छंन्नोऽस्मि। जपति। इदमहं
पंचदशेन वज्रेण द्विषन्तं भ्रातृव्य मवक्रामामि योऽस्मा
न्द्वेष्टि यंच वयं द्विष्मः। दक्षिणेन पादेनोत्तरां वेदि-
श्रोणि मवक्रामति। अत्र तिष्ठन्सामिधेनी रन्वाह
वाचं नियम्य। हृदय देशेंजलिं कृत्वा। अग्नये सामिधे-
मानायानुब्रू ३ हीति संप्रेषिते। ब्रह्मन्सामिधेनी रनु
वक्ष्यामि। ब्रह्माण मामंत्रयते। ॐ मनुब्रू ३ हीति
ब्रह्मणा प्रसव उक्तो दश होतारं व्याख्याय।

चित्तिः स्रुक् । चित्तमाज्यं । वाग्वेदिः । आधीतं बर्हिः ।
केतो अग्निः । विज्ञातमग्निः । वाक्पतिर्होता । मन उप-
वक्ता । प्राणो हविः । सामाध्वर्युः । भूर्भुवः सुवः । -
जपति । हिं, हिं, हिं, । त्रिर्हिंकृत्य । प्रवो वाजा अभिद्यवो
हविष्मन्तो घृताच्या देवाञ्जिगाति सुम्नयों ३ प्रवो वाजा-
- सुम्नयों ३ प्रवो वाजा० - सुम्नयों ३ मग्न आया
हि वीतये गृणानो हव्य दातये । नि होता सत्सि बर्हिषी ३
तन्त्वा समिद्भिरंगिरः । घृतेन वर्धयामसि । बृहच्छोचा-
यविष्ठ्यो ३ ऍ सनः पृथुः श्रवाय्य मच्छा देव विवाससि
बृहदग्ने सुवीर्यो ३ मीडेन्यो नमस्य स्तिर स्तमाँसि-
दर्शतः । समग्नि रिध्यते वृषो ३ वृषो अग्निः समिध्यते
अश्वोन देव वाहनः । तऍ हविष्मन्त ईडतो ३ वृषणं त्वा वयं
वृषन् वृषणः समिधी महि । अग्ने दीद्यतं बृहो ३ मग्निं-
दूतं वृणीमहे होतारं विश्ववेदसं । अस्य यज्ञस्य सुक्रतो ३
ऍ समिध्य मानो अध्वरेऽग्निः पावक ईड्यः । शोचिष्केश-
स्तमीमहो ३ ऍ समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर ।
त्वऍ हि हव्यवाडसों ३ [आजुहोत दुवस्यताग्निं प्रयत्यध्वरे
वृणीध्वऍ हव्यवाहनों ३ आजुहोत० - हनो ३ आजुहो-
हनो ३]

त्वंवरुण उत मित्रो अग्ने त्वां वर्धंति मतिभिर्वासिष्ठाः
स्त्वे नसु सुषणनानि संतु यूयं पात: स्वस्तिभिः —
सदानो ३ त्वंवरुण ० — सदानो ३ त्वंवरुण ० — सदा-
नो ३ मग्ने महाँ असि ब्राह्मण भारत। वासिष्ठेन्द्रप्रमदा
भरद्वसो। आशार्जिवेद: [देवेध्दो मान्वे ध्द ऋषिष्टुतो-
विप्रानुमादित: कविशस्तो ब्रह्मसँ शितो घृताहवनः।
प्रणीर्यज्ञानाँ रथीरध्वराणां अतूर्तो होता तूर्णिर्हव्यवाट्।
आस्पात्रं जुहूर्देवानां चमसो देवपानो राँ इवाग्ने नेमि-
र्देवाँ स्त्वं परिभूरस्या वह देवान् यजमानाय] अपानीति
आग्नेमग्न आ ३ वह। सोमामा ३ वह। आग्निमा ३ वह।
प्रजापतिं (उपांशु) आ ३ वह। उच्चै:। आग्नीषोमावा ३
वह। इन्द्राग्नी मृधमा ३ वह। (इति पौर्णमास्यां) आग्निमग्न
आ ३ वह। सोममा ३ वह। आग्निमा ३ वह। इन्द्राग्नी-
आ ३ वह। (इत्यमावास्यायाँ) [सन्नयतस्तु।-
इन्द्रमा ३ वह। इन्द्रयाजिन:। महेन्द्रमा ३ वह। महेन्द्र
याजिनः।] उभयत्र। देवाँ आज्यपाँ आ ३ वह।
आग्निँ होत्राया वह स्वं महिमान मा ३ वह। -
आ चाग्ने देवान्वह सुयजा च यज जातवेद:। तत्रैवो—

ध्वर्युरुपवेशाते। असौमा उ गुण: इतिश्रुत्वा।
उपोत्थाय। नमो मात्रे पृथिव्यै। पृथिवीमभिमृशति।
पृथिवीहोता। द्यौरध्वर्यु:। रुद्रोग्नीत्। बृहस्पतिरुपवक्ता।
अग्निर्होता। अश्विनाध्वर्यू। त्वष्टाग्नीत्। मित्रउपवक्ता।
सूर्यं मे चक्षु:। वातं प्राण:। द्यां पृष्ठं। अंतरिक्षमात्मा।
अंगैर्यज्ञं। पृथिवीं शरीरै:। महाहविर्होता। सत्यहविरध्वर्यु:। अच्युतपाजा अग्नीत्। अच्युतमना उपवक्ता।
अनाधृष्यश्चा प्रतिधृष्यश्च यज्ञस्याभिगरौ। अयास्य उद्गाता। तूष्णीमभिक्रम्य। इंद्रमन्वारभामहे होतृवूर्ये
पुरोहित। येनायज्जुत्तमं स्वर्देवा अंगिरसो दिवं।
सव्येन दक्षिणहस्तेनाध्वर्युमन्वारभते। तूष्णीं सव्येनाग्नीध्रं
षष्ठिश्चाध्वर्योजानां तिष्ठ्युपाङ्गा उध्वर्युमाग्नेभंतरा विपश्चित:
सिनाति पाकमतिधीर अमृतस्य पथा मन्वौमे होता।
चतुर्होता पंचहोता षड्ढोता, सप्तहोता जपाति। समुद्रंगा
वेपदं। एते मन्त्रैरुत्तरेणाहवनीयमध्वर्युं च प्रत्यङ्ङेत्य
आदित्यस्यावृतमन्वावर्ते। प्रदक्षिणमावर्तते प्राङ्मुखो
भूत्वा। षड्गोर्वीरंहसस्पांतु द्यौश्च पृथिवी चाहश्च
रात्रिश्च कृषिश्च वृष्टिश्च त्विषिश्चापो वीरुधश्चापश्चौष-

धयन्श्च। उपाती। होतृषदनप्राप्य। निरस्तः परावसुः।
होतृषदनान्तृणांनिरस्य। अप उप स्पृश्य। येनेः सपत्ना
अपते मंतांत्वेन्द्राग्निभ्याम वं त्वा जामहे ताज्। नरावोरुद्रा-
आदित्या उपरि स्पृशौ मोग्रं चेत्तार माधिराजगोजान॥
होतृषदनमन वाधते अभ्युक्ष्य होतृषदनं। आन्तोतत उदु-
द्रनोभ्क्ष मेधं पातं गोद्यावा पृथिवी उद्यानरः। रीदिहोतः स्व-
उलोके। चिं कित्वान्सादया यज्ञं सुकृतस्य योनौ॥
देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः॥
इतितास्मिन्नुपाविशति। निहोताहोतृषदने विदानस्त्वेषो-
दीदिवां असदत्सुदक्षः। अदब्धव्रतप्रमतिर्वसिष्ठः
सहस्रं भरः शुचिजिह्वो अग्निः॥ आसीनो जपति।
लोककृतौ लोकं मे कृणुतं माभासंतापा मेषवान्लोकः।
गार्हपत्याहवनीयौ समीक्षते। प्रमेभूतभागधेयं यथावो
येनपथा हव्यमावो वहाग्नि जुष्टामद्य देवेभ्यो वाचमुद्यासं
जुष्टां ब्रह्मभ्यो जुष्टां नाराशंसाय॥ देवता उपतिष्ठते।
ततः स्रुचावादापयाति। अग्निर्होता वेत्त्वग्निर्होत्रं वेत्तु
प्रावित्रं स्गोवयं साधुतो यजमान देवता। घृतवती-
मध्वर्यो स्रुचमास्यस्व देवायुवं। विश्ववारा मीडामहै-

देवाँ ईडेन्यांन्नमस्याम नमस्यान्यजाम यज्ञियान्॥
ये३ यजामहे भूर्भुवः सुवः सामिधो अग्न आज्यस्य
वियंतु ३ वौ३ षट्। वषट्कृत्या प्राण्यापान्यानिमेषेत्।
वागोर्जः सह ओजो वाग्वषट् कार नमस्ते अस्तु माभा-
हिँसीः॥ प्रत्युक्तं वषट्कार मनुमंत्रयते। ये३ यजामहे
भूर्भुवः सुवः [स्तनूनपादग्न आज्यस्य वेतु ३ वौ३ षट्।
वासिष्ठराजानु तनूनपादित्यस्य स्थाने] ये ३ यजामहे -
भूर्भुवः सुवर्नराशँसो अग्न आज्यस्य वेतु ३ वौ३ षट्।
ये३ यजामहे भूर्भुवः सुवरिडो अग्न आज्यस्य वियंतु
३ वौ ३ षट्। ये ३ यजामहे भूर्भुवः सुवर्बर्हिरग्न
आज्यस्य वेतु ३ वौ ३ षट्। ये३ यजामहे भूर्भुवः सुवः
स्वाहाग्निँ स्वाहा सोमँ स्वाहाग्निँ स्वाहा -
(प्रजापतिं) (उपांशु × उच्चैः) स्वाहाग्नीषोमौ स्वाहेन्द्रं
वैमृधँ स्वाहा देवाँ आज्यपाञ्स्वाहाग्निँ होत्राज्जुषा-
णो अग्न आज्यस्य वियंतु ३ वौ ३ षट्। [इतिपौर्णमास्यां]
ये३ यजामहे भूर्भुवः सुवः स्वाहाग्निँ स्वाहा सोमँ स्वाहा
ग्निँ स्वाहेंद्राग्नी स्वाहा देवाँ आज्यपान्स्वाहाग्निँ
होत्राज्जुषाणो अग्न आज्यस्य वियंतु ३ वौ ३ षट्।
(इत्यमावास्यायां)

सन्नयन्तस्तु। इन्द्राग्नीस्थाने इंद्रं वा महेन्द्रं वा।
वार्त्रघ्ना वाज्य भागौ। अग्निर्वृत्राणि जंघनद्द्रविण-
स्युर्विपन्यया। सामिद्धः शुक्र आहुतों ३। ये३ यजामहे
ग्निं भूर्भुवः सुवर्जुषाणो अग्नि राज्यस्य वेतु ३ वौ३ षट्।
त्वँ सोमासि सत्पति स्त्वँ राजोत वृत्रहा। त्वं भ-
द्रो आसि क्रतोँ ३। ये३ यजामहे सोमं भूर्भुवः सुव-
र्जुषाणः सोम आज्यस्य हविषो वेतु ३ वौ ३ षट्।
(पौर्णमास्यां) वृधन्वन्तावाज्य भागौ। अग्निः प्रत्नेन
जन्मना शुम्भानस्तनुवँ स्वां। कविर्विप्रेण वावृधोँ ३।
सुव ये ३ यजामहे ग्निं भूर्भुवः सुवर्जुषाणो अग्नि राज्यस्य [illegible]
वेतु ३ वौ ३ षट्। सोम गीर्भिष्ट्वा वयं वर्धयामो वचो-
विदः। सुमृडीको न आविशोँ ३। ये ३ यजामहे सोमं
भूर्भुवः सुवर्जुषाणः सोम आज्यस्य हविषो वेतु ३ वौ ३ षट्।
(इत्यमावास्यायां) प्रधानस्य। अग्निर्मूर्धा दिवः ककुत्प-
तिः पृथिव्या अयं। अपाँ रेताँ सि जिन्वतोँ ३।
ये ३ यजामहे ग्निं भूर्भुवः सुवर्भुवो यशस्य रजसश्च
नेता यत्रा नियुद्भिः सचसे शिवाभिः। दिवि मूर्धानं दधिषे
सुवर्षां जिह्वामग्ने चकृषे हव्यवाहोँ ३ वौ ३ षट्।

(प्रजापते न त्वदे तान्यन्यो विश्वा जातानि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाम्।
उपांशु) ओ३म् -उच्चैः। ये ३ यजामहे (उच्चैः)
(प्रजापतिं भूर्भुवः स्वः सवेद पुत्रः पितरँ समातरँ
रासूनुर्भूत्वा भुवत् पुनर्मघाः। स द्यामौर्णोदन्तरिक्षँ
स स्वः सा विश्वा भुवो अभवत्स आभवात् ३। उपांशु)
वौ ३ षट् (उच्चैः) अग्नीषोमा सवेदसा सहूती वनतं
गिरः। सं देवत्रा बभूवथोः ३। ये ३ यजामहे ग्नीषोमौ
भूर्भुवः स्वः युवमेतानि दिवि रोचनान्यग्निश्च सोम
सक्रतू अधत्तं। युवँ सिन्धूँ रभिशस्तेरवद्यादग्नीषो-
मावमुञ्चतं गृभीतान् ३ वौ ३ षट्। विनइन्द्र मृधोजहि नीचा
यच्छ पृतन्यतः। अधस्पदं तमीं कृधि यो अस्माँ अभिदा-
सतो ३। ये ३ यजामहे इन्द्रं वैमृधं भूर्भुवः स्वः रिन्द्रक्षत्र
मभि वाममोजोजायथा वृषभ चर्षणीनां। अपानुदो जन
मभित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकां ३ वौ ३ षट्।
[मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगामा परस्याः।
सृकँ सँ शाय पविमिन्द्र तिग्मं वि शत्रून्ताढि वि मृधो=
नुदस्व ३। वौ ३ षट्] इति पौर्णमास्यां ——

दर्शे आग्नेयानंतरं । इन्द्राग्नी रोचना दिवः परि वाजे
षु भूषथः । तद्वांचेति प्रवीर्यं ३ । ये ३ यजामहे
इन्द्राग्नी भूर्भुवः सुवः श्नथद्वृत्र मुतसनोति वाज मिं
द्रायो अग्नी सहुरी सपर्यात् । इरज्यंता वसव्यस्य भूरेः
सहस्तमा सहसा वाजयंता ३ वौ ३ षट् । अमावास्यायां ॥
एन्द्रसानसिं रयिं साजित्वानं सदासहं । वर्षिष्ठ मूत
ये भरौ ३ । ये ३ यजामहे इन्द्रं भूर्भुवः सुवः प्रसासाहिषे
पुरुहूत शत्रून् ज्येष्ठस्ते शुष्म इहरातिरस्तु । इन्द्राभर
दक्षिणेना वसूनि पतिः सिंधूना मसि रेवतीनां ३ वौ ३ षट्
महां इन्द्रो य ओजसा पर्जन्यो वृष्टिमां इव । स्तोमैर्व
त्सस्य वावृधौ ३ । ये ३ यजामहे महेन्द्रं भूर्भुवः सुव महां
इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः ।
अस्मद्रियग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूद् ३
वौ ३ षट् । (स्विष्टकृतः) पिप्रीहि देवां उशतो यविष्ठ
विद्वां ऋतूं ऋतुपते यजेह । ये दैव्या ऋत्विजः स्ते
भिरग्ने त्वं होतॄणामस्यायजिष्ठो ३ । ये ३ यजामहे
ग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामान्ययाट्
सोमस्य प्रिया धामान्ययाडग्नेः प्रिया धामान्ययाट् ।

~~सोमस्य प्रियाधामान्ययाऽऽ~~ (उपांशु — प्रजापतेः)
प्रियाधामान्ययाऽग्नीषोमयोः प्रियाधामान्यया इन्द्रस्य-
वैमृधस्य प्रियाधामान्ययाट् देवानामाज्यपानां प्रिया-
धामानि। यक्षदग्नेर्होतुः प्रियाधामानि यक्षत्स्वं महिमान
मायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषताᳬ
हविः। भूर्भुवः सुवरग्ने यदद्य विशो अध्वरस्य होतः पावक
शोचेवेष्ट्वᳬ हि यज्वा। ऋतायजासि महिना वियद्भू-
र्हव्यावह यानीष्ठ्याते अद्या ३ वौ ३ षट्। इति पौर्णमास्यां।
ये ३ यजामहेऽग्निᳬ स्विष्टकृतमयाडग्निरग्नेः प्रियाधा
मान्ययाट् सोमस्य प्रियाधामा०ययाडग्नेः प्रियाधामा
न्यया इन्द्राग्नियोः प्रियाधामा०ययाट् देवानामाज्य
पानां प्रियाधामानि। यक्षदग्नेर्होतुः प्रियाधामानि
यक्षत्स्वं महिमान मायजतामेज्या इषः कृणोतु सो
अध्वरा जातवेदा जुषताᳬ हविः। भूर्भुवः सुवरग्ने
यदद्य विशो अध्वरस्य होतः पावक शोचेवेष्ट्वᳬ हि-
यज्वा। ऋता यजासि महिना वियद्भूर्हव्यावह यवि
ष्ठ्याते आद्या ३ वौ ३ षट्। इत्यमावास्यायां।
[संनयतस्तु। इन्द्राग्निस्थाने। ये ३ यजामहेऽग्निᳬ स्विष्ट

कृतं भूर्भुवः सुव रयाडाग्निरग्ने: प्रियाधामान्यया?
सोमस्याप्रियाधामान्ययाऽग्ने: प्रियाधामान्ययाम्महेन्द्र
स्य प्रियाधामान्यया? देवाना माज्यपानां प्रिया धामानि।
यक्ष दग्नेर्होतुः प्रियाधामानि यक्षात्स्वं महिमान माय-
जता मेज्याइषः कृणोतुसो अध्वरा जातवेदाजुषता९ँ
हवि रग्ने यदद्यविशो अध्वरस्य होत: पावक शोचे वे-
ष्टव९ँ हि यज्वा। ॠतायजासि महिना वियद्भूर्व्या
वह्याविष्ठयाते अद्या ३ वौ ३ षट्।/आशाँते अंगुलिपर्वाणी
अवघ्राय। आपउपस्पृश्य। अध्वर्युपस्तीर्णे होतृपाणौ
होताद्विरादत्ते। अध्वर्युणा भिघारिते अंगुलीभि--
र्विनि गृह्य मुख साँमिता मिडा मुप ह्वयते।—
उपहूत९ँ रथंतर९ँ सह पृथिव्योपमार थंतर९ँसह पृ-
थिव्या ह्वयता मुपहूतं वाम देव्य९ँ सहांतरिक्षेणोपमा-
वामदेव्य९ँ सहांतरिक्षेण ह्वयता मुपहूतँ बृहत्सह दिवो-
पमा बृहत्सह दिवा ह्वयता मुपहूता; सप्तहोत्रा उपमा
सप्तहोत्रा ह्वयंता मुपहूता धेनु; सह र्षभोपमा धेनु:
सहर्षभा ह्वयता मुपहूतो भक्ष; ससोपमा भक्ष; सरवा
ह्वयता मुपहूतां ३ हो। अथोच्चै;। उपहूतेडो पहूतेडो—

पो अस्मा ऍ इडा ह्वयता मुपहूतेडो पहूतेडा। मानवी
घृतपदी मैत्रावरुणी ब्रह्म देव कृत मुपहूतं दैव्या अध्व-
र्यव उपहूता उपहूता मनुष्याः। य इमं यज्ञमवान् ये-
यज्ञपतिं वर्धानुपहूते द्यावा पृथिवी पूर्वजे ऋतावरी
देवी देव पुत्रे। उपहूतोयं यजमान उत्तरस्यां देवयज्या-
या मुपहूतो भूयासि हविष्करण उपहूतो दिव्ये धामन्नुप-
हूत इदं मे देवा हविर्जुषन्ता मिति तस्मिन्नुपहूतो
विश्व[illegible] मस्य प्रियमुपहूतं विश्वस्य प्रियस्योपहूतस्यो
पहूतः। इडामुपहूय। वाचस्पतये त्वा हुतं प्राश्नामि सदस-
स्पतये त्वा हुतं प्राश्नामि। अवान्तरेडां प्राश्नाति इडासि-
स्योनमासि स्योनकृत राजन्न रायस्पोषे सुप्रजास्त्वे धाः।
मरुतस्यत वा ध्रुम्जायं सुरभ्यास्यत्वायं तां प्राश्नामि।
इडाभागं प्राश्य। मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं
धातु यज्ञं समिमं दधातु। बृहस्पतिस्तनुतामिमं नो विश्वे-
देवा इह मादयन्ताम्। मार्जयित्वा पृथिव्यै मा गौरसि।
होतृभागं प्राश्य। दक्षिणां प्रतिग्रहीष्यन्सप्तदश कृत्वो
पान्यात। देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यां प्रतिगृह्णामि राजा त्वा वरुणो नयतु देवि दक्षिणे

ब्रह्मणं ओदनं तेनामृतत्वमश्यां वयो दात्रे भूयात्
मयो मह्यमस्तु प्रतिग्रहीत्रे क इदं कस्मा अदात्कामः कामाय
कामो दाता कामः प्रतिग्रहीता काम॑ समुद्रमाविश कामे
नत्वा प्रतिगृह्णामि कामैतत्ते एषा ते काम दक्षिणोत्तान-
स्त्वाङ्गिरसः प्रतिगृह्णातु । अनूयाजे देवान् यज नोतिसंप्रे
षिते । भूर्भुवः सुवर्देवं बर्हिर्वसुवने वसुधेयस्य वेतु ३
वौ ३ षट् । भूर्भुवः सुवर्देवो नराशं॑ सो वसुवने वसुधेय
स्य वेतु ३ वौ ३ षट् । भूर्भुवः सुवर्देवो अग्निः स्विष्टकृ-
त्सुद्रविणा मन्द्रः कविः सत्यमन्मायजी होता होतुर्होतु-
रायजीयानग्ने यान् देवानयाड्या॑ अपिप्रेये ते होत्रे
अमत्सत । ता॑ ससनुषी॑ होत्रां देवंगमां दिवि देवेषु
यज्ञमेरयेम॑ स्विष्टकृच्चाग्ने होताभूर्वसुवने वसुधे-
यस्य नमोवाके वीहि ३ वौ ३ षट् । सूक्तवाकाय संप्रेषितो ।
इदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाक मुत नमोवाक
मृध्यास्म सूक्तोच्यमग्ने त्व॑ सूक्तवागसि । उपाश्रितो
दिवः पृथिव्यो रोमन्वती तोस्मिन् यज्ञे यजमान द्यावा
पृथिवी स्तां । शंगये जीरदानू अत्रस्नू अप्रवेदे उरुगव्यू-
ती अभयंकृतौ । वृष्टिद्यावा रीत्यापा शंभुवौ मयोभुवा-

वृजस्वतीच पयस्वतीचसूपचरणाच स्वाधीचरणाच तयोराविदि। अग्निरिदं हविरजुषतावीवृधत महोज्यायोकृत। सोमइदं हविरजुषतावीवृधत महोज्यायोकृत। अग्निरिदं हविरजुषतावीवृधत महोज्यायोकृत। प्रजापतिः(उपांशु) इदं हविः (उच्चैः) अजुषतावीवृधत।(उपांशु) महोज्यायः। (उच्चैः) अकृत।(उपांशु)। अग्नीषोमाविदं हवि रजुषेतामवीवृधेतां महोज्यायो क्रातां। इंद्रोवैमृध इदं हविरजुषतावीवृधत महोज्यायोकृत।(दर्शे) अग्नेरिदं हविरजुषतावीवृधत महोज्यायोकृत। सोमइदं हविरजुषतावीवृधत महोज्यायोकृत। अग्निरिदं हविरजुषतावीवृधत महोज्यायोकृत। इन्द्राग्नीइदं हविरजुषेतामवीवृधेतां महोज्यायो क्रातां। सन्नयतस्तु (इन्द्राग्नीस्थाने) इंद्रइदं हवि-रजुषतावीवृधतमहोज्यायोकृत। महेन्द्र इदं हविरजु-षतावीवृधत महोज्यायोकृत। इतिवा। उभयत्र। देवा आज्यपा आज्यमजुषंतावीवृधंतमहोज्यायोक्रत। अग्निहोत्रेणेदं हविरजुषतावीवृधत महोज्यायोकृत।

अस्यामृधद्धोत्रायां देवंगमायामाशास्तेऽयं यजमानः।
अमुकशर्मा यजमानः। नक्षत्रनाम सोमयाजीति-
तृतीयं। आयुराशास्ते सुप्रजास्त्वमाशास्ते सजातवन-
स्यामाशास्त उत्तरां देवयज्यामाशास्ते भूयो हविष्कर-
णमाशास्ते दिव्यं धामाशास्ते विश्वं प्रियमाशास्ते
यदनेन हविषाशास्ते तदश्यात्तदृध्यात्तदस्मै देवा रासंतां
तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः। इष्टं च
वीतं चोभे च नो द्यावापृथिवी अंहसस्पातामिह गति-
र्वामस्येदं च नमो देवेभ्यः। शंयोर्ब्रूहीति संप्रेषेण।
तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतये।
दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु
भेषजं शन्नो अस्तु द्विपदे शं चतुष्पदे। हविः शेषं-
प्राश्य। वेदमादाय पत्नीसंयाजार्थं प्रत्यङेत्य। अपरेण
गार्हपत्यमुपविश्य संयाजयंति। आप्यायस्व समेतु ते
विश्वतः सोमवृष्ण्यं। भवावाजस्य संगथे ३। ये ३ य-
जामहे सोमं भूर्भुवः सुवः संते पयाऽसि समु यंतु वाजाः
संवृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय
सोम दिवि श्रवाऽस्युत्तमानि धिष्व ३ वौ ३ षट्।

इहत्वष्टारमग्रियं विश्वरूपमुपह्वये। अस्माकमस्तु-
केवलो ३। ये ३ यजामहे त्वष्टारं भूर्भुवः स्वः स्वांनः
स्तुरीप मधापोषयित्नु देवत्वष्टर्निरराणः स्यस्वा यतो-
वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामा ३
वौ ३ षट्। देवानां पत्नीरुशतीरवन्तु नः प्रावन्तु नः स्तुज
ये वाजसातये। याः पार्थिवासो या अपामपि व्रते
ता नो देवीः सुहवाः शर्म यच्छन्तो ३। ये ३ यजामहे
देवानां पत्नीर्भूर्भुवः स्वः उत ग्ना वियन्तु देवपत्नीरिन्द्रा
ण्यग्नाय्यश्विनी राट्। आ रोदसी वरुणानी शृणोतु वियन्तु-
देवीर्य ऋतुर्जनीनां ३ वौ ३ षट्। राकामहं सुहवां
सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्मना। सीव्यत्वपः
सूच्याच्छिद्यमानया ददातु वीरं शतदायमुक्थ्यों ३।
ये ३ यजामहे राकां भूर्भुवः स्वः यास्ते राके सुमतयः
सुपेशसो याभिर्ददासि दाशुषे वसूनि। ताभिर्नो अद्य-
सुमना उपागहि सहस्रपोषं सुभगे रराणा ३ वौ ३ षट्।
सिनीवालि पृथुष्टुके या देवानामसि स्वसा। जुषस्व ह-
व्यमाहुतं प्रजां देवि दिदिड्ढिनो ३। ये ३ यजामहे सिनी-
वालीं भूर्भुवः स्वः या सुपाणिः स्वङ्गुरिः सुषूमा बहुसूवरी

तस्यै विश्पात्नियै हविः सिनीवाल्यै जुहोतन। ३ वौ ३ षट्।
कुहूमहं सुभगां विद्मनापसमस्मिन्यज्ञे सुहवां
जोहवीमि। सानो ददातु श्रवणं पितृणां तस्यास्ते देवि
हविषा विधेमों ३। ये ३ यजामहे कुहू भूर्भुवः सुवः
कुहूर्देवानाममृतस्य पत्नी हव्या नो अस्य हविषश्चि-
केतु। संदाशुषे किरतु भूरिवामं रायस्पोषं चिकि-
तुषे दधातु। ३ वौ ३ षट्। अग्निर्होता गृहपतिः सराजा
विश्वा वेद जनिमा जातवेदाः। देवानामुत यो मर्त्यानां
याजिष्ठः सप्रयजता मृतावों ३। ये ३ यजामहे ग्निं
गृहपतिं भूर्भुवः सुवर्वयमु त्वा गृहपते जनानामग्ने अकर्म
समिधा बृहन्तं। अस्थूरिणो गार्हपत्यानि सन्तु तिग्मे
नगस्तेजसा सं शिशाधि ३ वौ ३ षट्। अथाग्ने-

अथ अंगुष्ठपर्वणी आघ्राय। आप उपस्पृश्य। आग्नेयडामु-
पहूयते। उपहूतं रथंतरं सह पृथिव्योपमा रथंतर-
ं सह पृथिव्या ह्वयतामुपहूतं वामदेव्यं सहान्तरिक्षे-
णोपमा वामदेव्यं सहान्तरिक्षेण ह्वयतामुपहूतं बृहत्
सह दिवोपमा बृहत्सह दिवा ह्वयतामुपहूताः सप्तहोत्रा
उपमा सप्त होत्रा ह्वयंतामुपहूता धेनुः सह ऋषभोपमा -

धेनुः सहर्षभास्त्वयता मुपहूतो भक्षः सखोपमाभक्षः
सखास्त्वयता मुपहूतां इहो। उपहूतेडोपहूतेडोपो अस्मा-
ऽइडास्त्वयता मुपहूतेडोपहूतेडा। मानवी घृतपदी मैत्रा-
वरुणी ब्रह्मदेवकृत मुपहूतं दैव्या अध्वर्यव उपहूता
उपहूता मनुष्याः। यइमंयज्ञमवान् ये ~~यज्ञपतिं~~ यज्ञपत्नीं
वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपुत्रे।
उपहूतोऽयंयजमानेंद्राणीनावैधवा। दीर्घोरिव सुपुत्रो नरस्यां
दैवयज्यायामुपहूता भूयासीहविष्करण उपहूता। दिव्ये धामन्नुप-
हूतेदं मे देवा हविर्जुषंतामितितास्मिन्नुपहूता विश्वमस्याः प्रि-
यमुपहूतं विश्वस्य प्रियस्योपहूतस्योपहूता। तूष्णीं प्राश्य।
आचम्य। वेदोऽसि वित्तिरसि। वेदय कर्मासि करुणमसि
क्रियमसि सनिरसि सनितासि सनेयं घृतवंतं कुलायि-
नं रायस्पोषं सहस्रिणं वेदो ददातु वाजिनं। वेदैकदेशं
तृणमेति गार्हपत्यात्संततमाहवनीयात्। यथेतं प्राति-
निधनामाति॥ --- श्रीयज्ञनारायणार्पणमस्तु॥ ---

॥ इति दर्शपूर्णमास याजुष हौत्र प्रयोगः॥

करंदीकरोपाख्यः अनंततनयः प्रकाशशर्मा, कोंकणप्रांतीय पुरस्क
ग्रामवासी एतेन लिखितः, स्वार्थ परार्थंच, शके १९१२ प्रमोद संवत्सरे
पौष शुक्ल द्वितीयायां गुरुवासरे समाप्तः॥